[1]गव्यः । द्व्यचः खल्वपि – [2]धन्यम् । स्वर्ग्यम् । यशस्यम् । आयुष्यम् । असङ्ख्यापरिमाणाश्वादेरिति किम् ? पञ्चानां निमित्तम् पञ्चकम् । सप्तकम् । अष्टकम् । परिमाण – प्रास्थिकम् । [3]खारीकम् । अश्वादि – [4]आश्विकः ।

[५१३] ब्रह्मवर्चसादुपसङ्ख्यानम्[5] । (म.भा. २.३५१)
ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगः ब्रह्मवर्चस्यम् ।

अश्व । अश्मन् । [6]गण । ऊर्णा । उमा । वसु । [7]वर्ष । भङ्ग । अश्वादिः ॥

## पुत्राच्छ च । (४०/१७०६)

पुत्रशब्दाच् छः प्रत्ययो भवति, चकाराद् यत् च, 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८/१७०४) [8]इत्येतस्मिन् विषये । द्व्यचः (५.१.३९/१७०५) इति नित्ये यति प्राप्ते वचनम् । [9]पुत्रस्य निमित्तं संयोगः उत्पातो वा [10]पुत्रीयम्, पुत्र्यम् ॥

## सर्वभूमिपृथिवीभ्यामणञौ । (४१/१७०७)

सर्वभूमिपृथिवीशब्दाभ्यां यथासङ्ख्यम् अणञौ प्रत्ययौ भवतः 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८/१७०४) इत्येतस्मिन् [11]विषये । ठकोऽपवादौ । सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । पार्थिवः । सर्वभूमेः अनुशतिकादि (७.३.२०/१४३८ ग.पा.) पाठादुभयपदवृद्धिः ॥

## तस्येश्वरः । (४२/१७०८)

तस्य इति षष्ठीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां [12]यथासङ्ख्यमणञौ प्रत्ययौ भवतः ईश्वरः इत्येतस्मिन् विषये । सर्वभूमेः ईश्वरः सार्वभौमः । पार्थिवः । षष्ठीप्रकरणे पुनः [13]षष्ठीसमर्थविभक्तिनिर्देशः प्रत्ययार्थस्य [14]निवृत्तये । अन्यथा [15]संयोगोत्पाताविव ईश्वरोऽपि प्रत्ययार्थस्य निमित्तस्य विशेषणं संभाव्येत ॥

## तत्र विदित इति च । (४३/१७०९)

तत्र इति सप्तमीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां यथासङ्ख्यम् अणञौ प्रत्ययौ भवतः विदितः इत्येतस्मिन्नर्थे[16] । विदितो ज्ञातः प्रकाशितः इत्यर्थः । सर्वभूमौ विदितः सार्वभौमः । पार्थिवः ॥

## लोकसर्वलोकाट्ठञ् । (४४/१७१०)

लोकसर्वलोकशब्दाभ्यां [17]तत्र इति सप्तमीसमर्थाभ्याम् विदितः इत्येतस्मिन् [18]विषये ठञ् प्रत्ययो भवति । लोके विदितः लौकिकः । [19]सार्वलौकिकः । अनुशतिकादित्वात् (७.३.२०/१४३८ ग.पा.) उभयपदवृद्धिः ॥

---

1. गव्यम् ङ.फ.ह. 2. धनस्य निमित्तम् इत्यधिकम् ह.ब, धन्यः स्वर्ग्यः यशस्यः आयुष्यः क. ह, यशसो निमित्तं यशस्यः फ. 3. खारिकम् ह. 4. आश्विकम् ह, आश्मिकः क. फ. ङ. 5. कर्तव्यम् इत्यधिकम् क. 6. गुण क, हस्ति इत्यधिकम् क. 7. वर्षा क. 8. इत्यादौ क. 9. पुत्रस्य–उत्पातो वा नास्ति ह. 10. पुत्रीयः पुत्र्यः क.फ. 11. अर्थे क.ह. 12. यथासङ्ख्यम् नास्ति अ.ब.क.ङ.ग. 13. षष्ठी नास्ति फ. 14. निवृत्तेषु क. 15. संयोगोत्पातवत् क. 16. विषये फ, चकारात् ईश्वर इत्यर्थे च इत्यधिकम् क. 17. तत्र नास्ति फ. 18. अर्थे ह.क.फ. 19. नास्ति फ.